শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঘুনাথাধ্ৱরিৱিরচিতা

# ॥ আচার্যৱিংশতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ আচার্যৱিংশতিঃ ॥

স্বান্তান্তস্সন্ততাসীনপ্রাচীনার্ৱন্তমাশ্রযে
ত্রয্যন্তসূরিমাশ্চর্যচর্যং তং তারকং সতাম্॥ **1** ॥

মথনদশাৱিশালকলশাব্ধিকৃশান্যভৃশা
পতিতসুধামুধাকরৱিধাঃ কিল যস্য গিরঃ।
জগতি জযন্তি তস্য তুরগাস্যৱিকল্পতনো -
র্নিগমশিখাগুরোশ্চরণমস্মি গতশ্শরণম্॥ **2** ॥

মণিমযঘণ্টযা সমুদভাৱি ফণীন্দ্রমহী -
ধরনিলযস্য পদ্মতনযস্য যদাত্মতযা।
জযতি জনান্তরঙ্গঘনতুঙ্গতমাঘতমঃ -
ক্ষপণ কৃপাৱতার সৱিতা স গুরুপ্রৱরঃ॥ **3** ॥

স্ফুরদুরুতর্ক কর্কশ নখাঙ্কুশসন্দলিত -
প্রতিকথকেভ কুম্ভ ৱিগলন্মণিমালিকযা।
যতিপতিভারতীসুদৃগুরোরুহকুম্ভতটীং
জগতি ৱিভূষযন্ ৱিজযতে কৱিসিংহগুরুঃ॥ **4** ॥

কুমতিমতানলোচ্চলদুদারশিখাৱলযা -
ন্তরগতলোকশোকপরিমোচনসেচনকৃৎ।
চিরমতনীযসী জযতি পদ্মৱনীৱিগল -
ৎপরিমলবন্ধুরা গুরুধুরন্ধরসূক্তিসুধা॥ **5** ॥

অপহৃতদুগ্ধসিন্ধুসুষুমৈরহিরাজৱপু -
দ্যুতিভরসোদরৈরমৃতভানুৱিহারহরৈঃ।
নিগমকিরীটসূরিৱরকীর্তিমণিপ্রকরৈ -
রখিলহরিদ্বধূকুচতটীপরিকর্ম কৃতম্॥ **6**॥

ঘনমদৱাদিসঙ্ঘমকুটীতটপূর্ৱধরা -
ধরশিখরাঞ্চলে জগতি যস্য কথাসমরে।
লসতি যদীযসৰ্ৱপদভাগিলসৎকটকো
জযতি স ৱেঙ্কটেশগুরুরাডভিরামযশাঃ॥ **7**॥

শ্রুতিশিখরার্যৱর্যগুণদুগ্ধপযোধিভৱং
কণমপি ৱাকপতির্গণযিতুং কিল কুণ্ঠিতধীঃ।
কিমুত মিতংপচস্য কুদৃশস্তদপীহ বলা -
ন্মুখরযতি স্পৃহা গুরুধুরীণপদাব্জগতা॥ **8**॥

নিগমকিরীটসূরিৱচনামৃতৱারিনিধে -
রপি তলমস্পৃশন্নিজমনোরথপূর্তিমযাৎ।
হরিধৃতমন্দরপ্রমথিতাম্বুধিলব্ধসুধা
ভৱতি সুধাশসংসদিহ সম্যগুদাহরণম্॥ **9**॥

অপি ৱিমলান্ৱৱাযজনিলাভৱিদূরতরা
অপি চ শমাদিসম্পদভিরামমনোৱিধুরাঃ।
নিগমকিরীটসূরিচরণারুণতামরস -
স্মরণৱিকল্মষাস্সমুপযান্ত্যপি শেষশযম্॥ **10**॥

ভৱসলিলাকরান্তরভিমজ্জদুপঘ্নকরা
জনিতসুধাকরাংশুচযভাসুরধীপ্রকরাঃ।
কুমতিভযঙ্করান্ধতমসা হিমভানুকরা
দদতু শুভাঙ্কুরান্ কথকসিংহৱচোনিকরাঃ॥ **11**॥

নিগমশিখাগুরোরমরসিন্ধুতরঙ্গঘটা -
    মদহরলীলযা মহিতসূক্তিপরম্পরযা।
যতিপতিভাষ্যসৌধৱলভীপরিকর্মকৃতা
    ৱিজযপতাকযা সমজনীৱ সমুচ্ছ্রিতযা॥ **12**॥

ললিতসিতোর্ধ্ৱপুণ্ড্ররমণীযললাটতটং
    স্ফুরিতৱিভাতভানুরুচিভাতসরোজদৃশম্।
সুভগশিখোজ্জ্ৱলং সুমশরাসধনুস্সুষমা
    হররুচিরভ্রুৱং সুতমনন্তগুরোঃ কলযে॥ **13**॥

তিলসুমসোদরোন্নসমুদাররদাৱলিসং -
    স্ফুরদধরাধরীকৃতসমৌক্তিকৱিদ্রুমকম্।
সুললিতকর্ণপাশৱিলসন্মণিকুণ্ডলভা -
    ধলধলগণ্ডভিত্তিমভিরামমুখাম্বুরুহম্॥ **14**॥

পৃথুলসুৱৃত্তদীর্ঘভুজশৃঙ্গসুসঙ্গতিম -
    দ্রথচরণাম্বুজাঙ্কমনৱীনৱচশ্শিরসাম্।
গুরুৱরমাদ্রিযে তনুতরোদরকম্বুলসৎ
    গলতললম্বমানতুলসীনলিনাক্ষসরম্॥ **15**॥

সুমৱিশিখেষুধিপ্রতিমজঙ্ঘমুদগ্ররুচি -
    প্রবলজিতামলেন্দুনখরাঞ্চিতপদ্মপদম্।
অভিনৱরামণীযকনিদানমবোধতমো
    নিরসনভাস্করং ভজত ৱেঙ্কটনাথগুরুম্॥ **16**॥

জযতি স দেশিকো জগদরুন্তুদৱাদিগজ -
    প্রমথনকেসরী ৱিজযকেতুমিৱ প্রদদৌ।
শ্রুতিশিখরার্যৱর্যবিরুদং ভুৱি যস্য কথা
    রণতলদীৱ্যতস্সদসি রঙ্গধরামররাট্॥ **17**॥

হৃদি কলযন্তি যে নিগমমৌলিগুরোশ্চরণৌ
জগতি ভৱন্তি তে জিতকুৱাদিৱচোনিৱহাঃ।
চলিতসরস্বতীচরণনূপুরমঞ্জুতর -
ক্বণিতসুধাসদৃগ্বচনগন্ধিমুখাম্বুরুহাঃ॥ **18**॥

অতিভুজগাধিরাজমতিগীষ্পতি যস্য নযা
অতিকণভক্ষদৃষ্টিপদজৈমিনিৱাঙ্ভিনকরাঃ।
নিগমশিখাটৱীৱিহরমাণমনঃ কলভো
মম কুলদৈৱতং গুরুরসৌ নিগমান্তগিরাম্॥ **19**॥

ৱিষযৱিষানলজ্ৱলিতজীৱনিকাযসমু -
দ্ধরণকৃতেঽৱতীর্ণমহিরাজধরেন্দ্রৱিভোঃ।
কৃতনৱলীলমাশু করুণাৱরুণালযভূ -
ৱিমলসুধাকরং ভজত ৱেঙ্কটনাথগুরুম্॥ **20**॥

কৱনকলাসু ৱা কথকলোকমদাপহৃতি -
ক্ষমতরৱাঙ্ভিনগুম্ভরচনাকলনাস্বপি ৱা।
যদি কিল সাশতাহৃদয ৱেঙ্কটনাথগুরুং
ভজ ভজ দিষ্টসৃষ্টিসুরশাখিপদাব্জযুগম্॥ **21**॥

ইযমনৱীনসূক্তিশিখরার্যপদাম্বুরুহ -
প্রৱণসদার্যৱংশজনিমদ্বরদার্যসুতাৎ।
অজনি শকুন্তরাজজযকেতনদাসৱরাদ্
গুরুতিলকস্তুতির্দিশতু সা মুদমদ্য সতাম্॥ **22**॥

শেষাহিশাযিপদপঙ্কজভক্তিসিন্ধু -
পোষাৱহা শ্রৱণমাত্রৱশাজ্জনানাম্।
এষা স্তুতির্নিগমশেখরদেশিকস্য
ভূষামণীৱ সুদৃশাং হৃদযে চকাস্তু॥ **23**॥

সদ্বংশজস্সুৱৃত্তশ্শুভগুণশালী সদা ৱিশুদ্ধাত্মা
ৰঘুনাথদেশিকমণির্ৱিলসতু হৃদযে মহাগুৰুঃ শ্লাঘ্যঃ ॥ **24** ॥

॥ ইতি আচাৰ্যৱিংশতি সমাপ্তা ॥